In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

त्रिंशत्तमे वर्षे चतुर्थोऽङ्कः

१५ अक्टूबर २००८ ई०

११८ (अतिरिक्ताङ्कः)

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम०ए०, पीएच०डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

सम्पादकः

डा० अभिनव शुक्लः

एम०ए०, एम०फिल्०, पीएच०डी०

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अर्वाचीनसंस्कृतम् (३०/४ अतिरिक्ताङ्कः)

१५ अक्टूबर २००८ ई०

e-mail : arvacheenasanskritam@yahoo.co.in

arvacheenasanskritam@rediffmail.com

	विषयः	लेखकः	पृष्ठाङ्कः
१.	सम्पादकीयम्	रमाकान्तशुक्लः	1
२.	दीपमालिका-माङ्गल्यम् सं.२०६५	डा.उमाकान्त शुक्लः	2
३.	देववाणी-परिषद्वार्ता	ऋषिराज:पाठकः	3
४.	संस्कृत-जगद्वार्ताः	मुनिराज:पाठकः	9
५.	भवतां पत्रम्	प्रो. संघसेनः	17
६.	सूचना	महासचिवः	18
७.	संस्कृतगौरवगीतिः	प्रो.इन्द्रमोहनसिंहः	19
८.	काव्यरहस्यगीतिः	प्रो.इन्द्रमोहनसिंहः	20
९.	चन्द्रभवनगीतिः	प्रो.इन्द्रमोहनसिंहः	21
१०.	मिलनगीतिः	प्रो.इन्द्रमोहनसिंहः	22
११.	लोकवृत्तगीतिः	प्रो.इन्द्रमोहनसिंहः	23
१२.	जीवलक्ष्यगीतिः	प्रो.इन्द्रमोहनसिंहः	24
१३.	जीवनदर्शनगीतिः	प्रो.इन्द्रमोहनसिंहः	25
१४.	मानवानां कृते पादपः पाठयति	डा. रामेश्वर प्रसाद गुप्तः	26
१५.	श्रीमद्राधावल्लभाऽभिनन्दनम्	प्रो. 'अभिराज' राजेन्द्रमिश्रः	27
१६.	शिववीरिपरकं संस्कृत-साहित्यम्	डा.अभिनवशुक्लः	28
१७.	नवप्रकाशन-चर्चा	रमाकान्तशुक्लः	31
18.	**Form IV**		38
19.	प्रपञ्चचण्डचातुर्यं राष्ट्रं नयत्यधोगतिम्	डा. रामेश्वरदत्तशर्मा	39

1. अर्वाचीनसंस्कृते प्रकाशितेषु लेखेषु रचनासु च विचारा अभिप्रायाश्च तल्लेखकानामेव सन्ति। इदमावश्यकं नास्ति यत्तैः अर्वाचीनसंस्कृतस्य सम्पादकः प्रकाशकश्च सहमतो भवेत्।
2. अर्वाचीनसंस्कृतसम्बद्धाः सर्वेऽपि विवादा दिल्लीन्यायालयाधीना एव विचारणीयाः स्युः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य त्रिंशत्तमवर्षीययोस्तृतीयचतुर्थयोरङ्कयोः प्रकाशनानन्तरमयमतिरिक्तोऽङ्कः प्रकाश्यते यत्र प्रामुख्येन प्रो.इन्द्रमोहनसिंहस्य कविताः प्रकाश्यन्ते। एतासु गीतिसु संस्कृतस्य गौरवं काव्यरहस्यं च गीयते। कविः चन्द्रमण्डले स्वभवनं निर्मातुमिच्छति तत्र चाप्सरोभिः सेव्यमानः संस्कृतं सेवितुमिच्छति। स वसन्ततौ प्रियया मिलनमाकांक्षति, लोकवृत्तं वर्णयति, जीवनलक्ष्यं निरूपयति. आत्मानुभवैर्जीवनदर्शनस्य निश्चयञ्च प्रतिष्ठापयति।

एतदतिरिक्तं देवावाणी-परिषद्वार्ता संस्कृतजगद्वार्ता नवप्रकाशनचर्चा च प्रकाश्यन्ते। संस्कृतजगतद्वार्तानां प्रकाशनमत्यावश्यकं प्रतिभाति। देशस्य यत्र कुत्रापि कोणे आयोजितानां गतिविधीनां परिचय एताभिर्वार्ताभिर्लभ्यते। हर्षस्य विषयोऽयं यत् 15.10.2008 तो राष्ट्रियसंस्कृतसंस्थानेन 'संस्कृतवार्ता' नाम्न्यास्त्रैमासिकपत्रिकायाः प्रकाशनं प्रारब्धम् यत्र प्राधान्येन संस्थानस्य मुख्यालयस्य परिसराणां च वृत्तानि प्रकाश्यन्ते। संस्कृतजगति नित्यमेव किञ्चित् हृदयावर्जकं विचारोत्तेजकं च वृत्तं संघटितं जायत एव। न च तस्य संचारमाध्यमैर्ज्ञानं भवति। अतः संस्कृतसंस्थाभिः पत्रिकामाध्यमेन संस्कृतजगतो वृत्तानि संसूच्येरँश्चेत् तर्हि पाठकैतस्तेषां परिचयो लभ्येत। अत एव 'अर्वाचीनसंस्कृते' देववाणी-परिषद्वार्ताभिः साकं संस्कृतजगतो वार्ता अपि प्रकाश्यन्ते।

डा.रामेश्वरगुप्तस्य 'मानवाना कृते पादपः पाठयति' इत्यस्यां रचनायां पादपानां लोकशिक्षादायकं रूपं वर्ण्यते। डा.'अभिराज'राजेन्द्रमिश्रमहाभागेन राष्ट्रियसंस्कृतसंस्थानस्य नवनियुक्ताय कुलपतये किञ्च देववाणी-परिषदः प्राक्तनाध्यक्षाय 21.08.2008 तमे दिनाङ्के परिषदस्त्रयस्त्रिंशत्तमाधिवेशनावसरे समर्पितमभिनन्दनपत्रं प्रकाश्यते यत्र डा.त्रिपाठिनः सद्गुणानामुल्लेखपुरसरं संस्कृतस्य प्रतिष्ठा काम्यते। डा.रामेश्वरदत्तशर्मा स्वरचनायां कटुयथार्थं वर्णयति।

त्रिंशत्तमे वर्षे प्रकाशितानामङ्कानां पृष्ठसंख्या त्रिशत प्राया सञ्जाता। अतः परं 31. वर्षीया 32 वर्षीयाः 33 वर्षीयाश्च संयुक्ताङ्काः युगपत्-15.01.2008 तारिकायां प्रेषयिष्यन्ते। अस्मिन्नन्तराले भयावहघटनाभिः साकं सुखप्रदा अपि काश्चन घटना भारते जाताः, यथा चन्द्रयानप्रक्षेपणम्। बम्बविस्फोटैः जीवनस्य यात्रा अवरुद्धा न भवति। पर्वाणि मान्यन्त एव। दीपावलीपर्व सम्मुखं तिष्ठति, तदर्थम् पाठकेभ्यः शुभकामनाः समर्प्यन्ते। डा.उमाकान्तशुक्लस्य रचना दीपमालिकासौन्दर्यं चित्रयति।

(रमाकान्तशुक्लः)

२५.१०.२००८ प्रधानसम्पादकः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दीपमालिका-माङ्गल्यम् सं.२०६५

- डा.उमाकान्त शुक्लः (सपरिवारः)
ब्रह्मानन्दनीडम्, प्रियंवदा-वाटिका, ६०४ संजयमार्गः,
पटेलनगरम्, मुजफ्फरनगरम् (उ.प्र.) - २५१००१
दूरभाषः ०१३१-२६०१७३६ चलभाषः ९९९६०८३७०६२
e-mail: *shukla_umakant@rediffmail.com*

दीपावल्योऽमायां खचिताःश्रीभिर्लसन्तु चञ्चन्त्यः।
निकषदृषद्युन्मिषिताश्चामीकर्यो यथा रेखाः॥१॥
दीपकोद्योतसङ्क्रान्त्या लोक्यतां भावभूमिका।
मुक्ताविद्रुमवैदूर्यच्छाययेवाकुलीकृता॥२॥

अमा तमी दियरान की पाँत लसै छविमंत।
ज्यौं कसौटिया अंक मँह दिपै कनक दुतिमंत॥१॥
दीवारी दुति पेखि मन सौ सौ करत गुमान।
मुक्ताहल मूंगा अरू नीलम भयौ अजान॥२॥

How these rows and rows of lamps
Outstare this dark dark night
Like so many streaks of bullion making
A sooty touchstone look bright.

May the splendour of these myriad lamps
Your inner self inspire
With the mazy glow of a spectrum
Of coral, peare, saphire

(आंग्लभाषारूपान्तरकारः प्रो.जे.पी.सविता)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देववाणी-परिषद्वार्ता

१. अर्वाचीनसंस्कृतस्य त्रिंशवर्षपूर्त्यङ्कस्य विमोचनम्

कुरुक्षेत्रविश्वविद्यालये 30.07.2008 तमे दिनाङ्के समायोजिते अ.भा. प्राच्यविद्यासम्मेलनस्य चत्वारिंशत्तमस्य अधिवेशनस्य समापन- समारोहे अर्वाचीनसंस्कृतस्य त्रिंशवर्षपूर्त्यङ्क औपचारिकतया लोकार्पितो ऽभूत्। पत्रस्य प्रधानसम्पादकेन डा.रमाकान्तशुक्लेन मञ्चमागत्य अङ्कः पञ्चचत्वारिंशत्तमाधिवेशनमहाध्यक्षाय प्रो.सत्यव्रतशास्त्रिणे दत्तः। तेन तत्र हस्ताक्षराणि न्यस्तानि। पञ्चचत्वारिंशत्तमस्याधिवेशनस्योपाध्यक्षेण प्रो. महावीर अग्रवालमहाभागेन, चतुश्चत्वारिंशत्तमाधिवेशनमहाध्यक्षेण प्रो.सतीशचन्द्रझा महाभागेन, मुख्यातिथिना राज्यसभासदस्येन डा.रामप्रकाशमहाभागेन, महासचिव प्रो.सरोजाभाटेमहाभागया, कुरुक्षेत्रवि.वि.कुलपतिना प्रो.आर.पी.वाजपेयीमहाभागेन, स्थानीयसचिवेन प्रो. रणवीरसिंहेन च तत्र हस्ताक्षराणि कृतानि। प्रो.सुरेन्द्रमोहनमिश्रेण लोकार्पणस्य घोषणा कृता।

२. देववाणी-परिषदस्त्रयस्त्रिंशत्तमः संकल्पनादिवससमारोहः

21.08.2008 तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थान-सभागारे देववाणी-परिषदा स्वकीयस्त्रयस्त्रिंशत्तमः सङ्कल्पनादिवससमारोहः सम्मानितः। पं.रामजीलाल पालीवाल साङ्गवेदमहाविद्यालयस्य च्छात्रैः सर्वश्री- ओमप्रकाश सिकदेल-पुष्पराज घिमिरे-कृष्ण खनाल-हेम अधिकारिभिः वैदिक मङ्गलाचरणं कृतम्। श्रीऋषिराजपाठक-मुनिराजपाठकाभ्यां सामगानं कृतम्। परिषदः कार्याध्यक्षया श्रीमत्या रमादेवी शुक्लंया मुख्यातिथेः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः डा.राधावल्लभत्रिपाठिमहोदयस्य, समारोहाध्यक्षस्य वाराणसीस्थ सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतेः डा.' अभिराज 'राजेन्द्रमिश्र-महाभागस्य, विशिष्टातिथिरूपेण समुपस्थितस्य श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठस्य पूर्वकुलपतेः आचार्यश्रीधरवासिष्ठस्य च पुष्पगुच्छैः स्वागतं कृतम्। परिषन्महासचिवेन डा.रमाकान्तशुक्लेन वक्तृरूपेण सम्प्राप्ताय डा.प्रकाशपाण्डेयमहाभागाय सपुष्पगुच्छसमर्पणं स्वागतं व्याहृतम्।

तदनन्तरं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदे नियुक्तस्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रो.राधा वल्लभत्रिपाठिमहोदयस्य परिषत्पक्षतोऽभिनन्दनमक्रियत। प्रो. 'अभिराज' राजेन्द्रमिश्रेण अभिनन्दनपत्रं पठितम्। (द्र.पृ.27)

कुलपतिः प्रो.राधावल्लभत्रिपाठी डा.चन्द्रमौलिशुक्लप्रणीतस्य 'आयुर्वेदशास्त्रस्य परिप्रेक्ष्ये सत्याग्रहनीतिकाव्यस्य अनुशीलनम्' इत्याख्यस्य ग्रन्थस्य विद्वदर्पणं कुर्वन्।

तदनु 'अभिराज'राजेन्द्रमिश्रेण परिषदा प्रकाशितस्य डा. अभिनव शुक्लप्रणीतस्य 'श्रीधर भास्कर वर्णेकर-कृत 'श्रीशिवराज्योदयं' महाकाव्य का साहित्यशास्त्रीय अध्ययन' इत्याख्यस्य ग्रन्थस्य संशोधितपरिवर्तित संस्कणस्य लोकार्पणं कृतम्। तेन लोकार्पितस्य ग्रन्थस्य प्रथमं प्रतिरूपं मुख्यातिथये डा.राधावल्लभत्रिपाठिने. समर्पितम्।

तदनु कुलपतिना प्रो. राधावल्लभत्रिपाठिना डॉ. चन्द्रमौलिशुक्लप्रणीतस्य 'आयुर्वेदशास्त्रस्य परिप्रेक्ष्ये सत्याग्रहनीतिकाव्यस्य अनुशीलनम्' इत्याख्यस्य ग्रन्थस्य विद्वदर्पणं कृतम्। प्रो. त्रिपाठिना ग्रन्थस्य प्रथमं प्रतिरूपं विशिष्टातिथये आचार्यश्रीधरवासिष्ठमहाभागाय समर्पितम् द्वितीयञ्च प्रतिरूपं डॉ. प्रकाश पाण्डेयमहाभागाय उपायनीकृतम्। प्रो. त्रिपाठिना ग्रन्थकर्त्ता डॉ. चन्द्रमौलि शुक्लः ग्रन्थरचनार्थं वर्धापितः।

अतः परं साहित्य-वितरणमभूत्। मुख्यातिथि- विशिष्टातिथि-समारोहाध्यक्षैः-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

स्वकरकमलैः समुपस्थितेभ्यः कविभ्यः छात्रेभ्यः अतिथिभ्यश्च देववाणी-परिषत्प्रकाशिताः 'भाति मे भारतम्', 'भारतजनताहम्' इत्याद्याः ग्रन्थाः प्राभृतीकृताः।

तत्पश्चात् काव्यपाठः समजायत। श्रीऋषिराजपाठकः, श्रीमुनिराजपाठकः, डा.केशवरामशर्मा, डा.'अभिराज'राजेन्द्रमिश्रः, डा.रमाकान्तशुक्लः डा.राधावल्लभत्रिपाठी च स्वरचना अपठन्।

मुख्यातिथिना प्रो. त्रिपाठिना स्वाभिनन्दनस्योत्तरे देववाणी-परिषदः स्वाध्यक्षताकालीनानि संस्मरणानि श्रावितानि। तेन संस्थानस्य सभागारे परिषत्कार्यकलापेषु समायोजितेषु हर्षोऽभिव्यक्तः। परिषन्महासचिवेन डा. रमाकान्तशुक्लेन धन्यवादज्ञापनं कृतम्।

देववाणी-परिषदस्त्रयस्त्रिंशत्तमे सङ्कल्पनादिवससमारोहे (वामतो दक्षिणम्) विशिष्टातिथिः पूर्वकुलपतिः प्रो.श्रीधरवासिष्ठः, समारोहाध्यक्षः पूर्वकुलपतिः प्रो.'अभिराज'राजेन्द्रमिश्रः, मुख्यातिथिः कुलपतिः प्रो.राधावल्लभत्रिपाठी, देववाणी-परिषदःकार्याध्यक्षा श्रीमती रमाशुक्ला, परिषन्महासचिवः डा.रमाकान्तशुक्लः, वक्ता डा.प्रकाशपाण्डेयश्च। (द्वितीयपंक्तौ) वेदपाठिनश्छात्राः।

(२१.०८.२००८)

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

३. देववाणी-परिषदः एकविंशे पण्डितराज-महोत्सवे डा.'अभिराज' राजेन्द्रमिश्रः पण्डितराज-सम्मानेन सम्मानितः।

देववाणी-परिषदा शरत्पूर्णिमायां (14-10-2008 तमे दिनाङ्के)नव दिल्लीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य सभागारे एकविंशः पण्डितराजमहोत्सवः समायोजितः। वाराणसीस्थ-दरभङ्गस्थसंस्कृतविश्वविद्यालययोः पूर्वकुलपतिना किञ्च इण्टरनेशनल एसोसिएशन ऑफ संस्कृत स्टडीज-संस्थाध्यक्षेण आचार्य रामकरणशर्मणा सरस्वत्याश्चित्रे माल्यार्पणेन किञ्च दीपदीपनेन महोत्सवस्यः शुभारम्भः कृतः। नजफगढस्थ- पं. रामजीलाल पालीवाल-वेदवेदाङ्गविद्यालयस्य वेदपाठिभिः सर्वश्री-हेम अधिकारी-पुष्पराज घिमिरे- ओमप्रकाशसिकदेल-सन्तोषचतुर्वेदी-कृष्णखनाल-नीरेशशर्मभिः शुक्लयजुर्वेदमन्त्रैर्वैदिकं मङ्गलाचरणं विहितम्। रम्या शुक्ला सौन्दर्यलहरीतः पद्यमश्रावयत्।

तदनु, विश्रुतसंस्कृतपण्डिताय, महामहोपाध्यायाय किञ्च वाराणसीस्थ सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतये आचार्याय श्रीमते 'अभिराज', राजेन्द्रमिश्रमहोदयाय 'पण्डितराज-सम्मानः 2008' समर्पितोऽभूत्। समारोहाध्यक्षेण आचार्यरामकरणशर्मणा तस्मै उत्तरीयं, परिषन्महासचिवेन

डा.रामकरणशर्मा डा.रमाकान्तशुक्लश्च डा.'अभिराज' राजेन्द्रमिश्राय पण्डितराज-सम्मानपत्रं समर्पयतः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

डा.रमाकान्तशुक्लेन सम्मानपत्रम् परिषत्कार्याध्यक्षया श्रीमत्या रमादेवी शुक्लया श्रीफलं एकादशसहस्ररूप्यकराशेः धनपत्रं (चेकं) च समर्पितम्। सम्मानसमर्पणकाले वेदमन्त्राणां घोषः वेदपाठिभिः कृतः।

अस्मिन्नवसरे पण्डितराजजगन्नाथस्य गङ्गालहरी-भामिनीविलास-रसगङ्गाधरादिग्रन्थेभ्यः छात्रच्छात्राभिः पद्यानि श्रावितानि। कु. प्रियंवदा शर्मा, कुमारी शिवाङ्गी शुक्ला, श्रीभरतकिशोरचौधरी, श्रीमुनिराजपाठकः श्रीकेशवदत्तजोशी, मुकेशजोशी, गोविन्दवल्लभः, आशीषपाण्डेयः, रोहितकौशिकः इत्यादिभिः पण्डितराज-पद्यपाठः कृतः।

महोत्सवेऽस्मिन् पण्डितराजस्य विविधपक्षानधिकृत्य विद्वद्भिरभिभाषितम्। प्रयागतः समागतेन राष्ट्रियसंस्कृतसंस्थानस्य पूर्वोपनिदेशकेन डा.कशीनाथ तिवारिणा पण्डितराजजगन्नाथस्य अन्योक्तीरवलम्ब्याभिभाषितम्। राष्ट्रियसंस्कृत संस्थानस्य सहायककुलसचिवपदमलङ्कुर्वता डा.प्रकाशपाण्डेयेन विद्वरेण डा.सुलेखचन्द्रशर्मणा च पण्डितराजस्य काव्यलक्षणं समीक्षितम्। डा.अजय मिश्रेण आधुनिकसंस्कृतरचनाधर्मितायाः परिचयः प्रदत्तः पण्डितराजजगन्नाथश्च परवर्तिसंस्कृतयुगाय प्रेरणापुरुषत्वेन स्वीकृतः। प्रो.रमेशकुमारपाण्डेयेन पण्डितराजस्य भक्तिकाव्यमवलम्ब्याभिभाषितम्।

महोत्सवेऽस्मिन् एका संस्कृतकविगोष्ठी अप्यायोज्यत यत्र डा.रामकरणशर्मा, डा.'अभिराज' राजेन्द्रमिश्रः, डा.रमेशकुमारपाण्डेयः, डा. रमाकान्तशुक्लः, डा.चन्द्रभूषणझा, डा.परमानन्दझा, श्रीदिव्यानन्दझा, श्रीऋषिराजपाठकश्च स्वरचना अश्रावयन्।

पण्डितराजसम्मानेन अलङ्कृतेन प्रो. 'अभिराज' राजेन्द्रमिश्रेण कवीनां स्मृतौ आयोजिताः समारोहाः साहित्यसंस्कृत्योरेतादृगनुष्ठानत्वेन रेखाङ्किता यत्र वयं स्वगौरवमयमतीतं वर्तमानकालेन सह सन्तोलयन्तः स्वदृशां दिशञ्च निर्धारयितुमवसरं लभामहे। तेन पण्डितराजजगन्नाथस्य कर्तृत्वस्य व्यक्तित्वस्य च परिचयं प्रयच्छतोक्तं यत् पण्डितराजेन स्वजीवनस्य परिस्थितयः एव कवितारूपेण अभिव्यक्ताः। यदा कस्यचित् कवेर्व्यक्तित्वमेव द्रवीभूय काव्यगङ्गाभावमाप्नोति तदा तद्गङ्गायाः दर्शनमात्रेण सहृदयैर्मुक्तिसम आनन्दोऽनुभूयते। डा.मिश्रेण पण्डितराजस्य पद्यान्युद्धरतोक्तं- 'प्रतीयते यत् भगवत्या गङ्गाया व्याजेन पण्डितराजः स्वकवितायाः एव परिचयं ददाति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मन्ये स कथयति यत् केचित् मदीयकविताया: श्रवणं कुर्वन्ति, केचित् अनुसरणं कुर्वन्ति, केचित् तां गम्भीरतया पश्यन्ति, केचिच्च तस्या: संस्पर्शं कुर्वन्ति। किन्तु धन्या: सन्ति ते ये मामकीनकविताया: अमृतं पिबन्ति-

केऽपि स्मरन्त्यनुसरन्ति च केचिदन्ये पश्यन्ति पुण्यपुरुषा: कति च स्पृशन्ति।
मातर्मुरारिचरणाम्बुजमाध्वि! गङ्गे भाग्याधिका: कतिपये भवतीं पिबन्ति॥

समारोहाध्यक्षेण डा.रामकरणशर्मणा पण्डितराजजगन्नाथस्य अन्योक्ती: समुदाहरता संस्कृतवाङ्मयस्य अध्यापनशोधसम्पादनैस्सह जनसामान्यमावर्जयितुं समायोजितानं सारस्वतानुष्ठानानां प्रासङ्गिकता प्रतिपादिता।

देववाणी-परिषद: आजीवनसदस्ययया शिकोहाबादस्थ- बी.डी.एम. एम. गर्ल्स पी. जी. कालेजस्य संस्कृतविभागे रीडरपदमलङ्कुर्वत्या श्रीमत्या डा.सुकेशशर्ममहाभागया प्रणीतस्य **'भरतीय संस्कृति में मानव मूल्य और लोक कल्याण'** इत्येतच्छीर्षकस्य ग्रन्थस्य लोकार्पणमप्यभूत्। समारोहाध्यक्षेण प्रो.रामकरणशर्मणा ग्रन्थस्य विमोचनं कृत्वा तस्य प्रथमं प्रतिरूपं (कापी) मुख्यातिथये डा.'अभिराज' राजेन्द्रमिश्राय समर्पितम्। तदनन्तरञ्च ग्रन्थलेखिकया डा.श्रीमत्या सुकेशशर्ममहोदयया ग्रन्थस्य प्रतिरूपाणि एकादश विद्वद्भ्य: उपायनीकृतानि।

परिषन्महासचिवेन धन्यवादज्ञापनं कृतम्। शारदादेवीसंस्कृतविद्यापीठस्य श्रीरामजीलालपालीवाल वेदवेदाङ्गमहाविद्यालयस्य च्छात्रैश्च कृतेन शान्तिपाठेन महोत्सवस्य समापनमभूत्। **(ऋषिराज:पाठक:)**

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृत-जगद्वार्ता:

१. अ.भा. प्राच्यविद्यासम्मेलनस्य चतुश्चत्वारिंशत्तमम्अधिवेशनम्

28-30.7.2008 तमेषु दिनाङ्केषु कुरुक्षेत्रविश्वविद्यालये अखिलभारतीय विद्यासम्मेलनस्य चतुश्चत्वारिंशत्तममधिवेशनं समाजोज्यत। सम्मेलनेऽस्मिन् एकविंशतिसंख्याकेष्वनुभागेषु विविधविषयानवलम्ब्य विद्वद्भि: शोधपत्राणि प्रस्तुतानि। श्रीमत्या सोनियागान्धीमहाभागया अधिवेशनस्य उद्घाटनं कृतम्। पञ्चचत्वारिंशत्तमस्याधिवेशनस्य कृते प्रो.सत्यव्रतशास्त्री महाध्यक्षत्वेन निर्वाचितोऽभूत्। सम्मेलनावसरे 'गीताभवन' नाम्नि सभागारे 28.07.2008 तमे दिनाङ्के सांस्कृतिक: कार्यक्रम: समायोज्यत।



संस्कृतकविसम्मेलने मञ्चस्था: डा.हरिदत्तशर्मा, डा.रमाकान्तशुक्ल:, आचार्यदिगम्बरमहापात्र:, डा.सुभाषवेदालङ्कारश्च (२९.०७.२००८)

29.07.2008 तमे दिनाङ्के तत्रैव सार्धषड्वादनत: सपादनववादनं यावत् रात्रो संस्कृतकविसम्मेलन मायोज्यत यस्याध्यक्ष्यं डा.रमाकान्तशुक्लेन निर्व्यूढम्। मुख्यातिथिरूपेण डा.सुभाषवेदालङ्कार:, विशिष्टातिथिरूपेण डा.हरिदत्तशर्मा किञ्च सारस्वतातिथिरूपेण आचार्यश्रीदिगम्बरमहापात्र: समुपातिष्ठत्। कविसम्मेलस्य सञ्चालनं डा.प्रशस्यमित्रशास्त्रिणा कृतम्। पञ्चविंशतिप्रायै: कविभि: स्वकविता: पठिता:।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

30.07.2008 तमे दिनाङ्के समापनसमारोहः समायोज्यत यत्र डॉ. रामप्रकाशः मुख्यातिथित्वेन समुपस्थितः। कुलपतिः प्रो. आर. पी. वाजपेयी, चत्वारिंशत्तमस्याधिवेशनस्याध्यक्षः प्रो.सतीशचन्द्रझा अन्ये च केचन प्रतिनिध योऽधिवेशनमवलम्ब्य स्वविचारान् प्रास्तुवन्।

स्थानीयसचिवः प्रो.रणवीरसिंहः स्वसहयोगिभिस्सहाधिवेशनस्यायोजनार्थं विद्वद्भिर्वर्धापितः।

अ.भा. प्राच्यविद्या सम्मेलनस्य चतुश्चत्वारिंशत्तमेऽधिवेशने अनुभागेषु शोधपत्राणि पठन्तः विद्वांसः



१. आधुनिकसंस्कृतानुभागे डा.बलदेवानन्दसागरः २. डा.चन्द्रभूषणझा ३. डा.रमाकान्तशुक्लः ४. डा.मंजूलता शर्मा ५. सौन्दर्यशास्त्र काव्यशास्त्रानुभागे डा.अभिनवशुक्लः। आधुनिकसंस्कृतानुभागस्याध्यक्षः प्रो.हरिदत्तशर्मा। सौंदर्यशास्त्रानुभागस्याध्यक्षः प्रो.आनन्दकुमारश्रीवास्तवः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

अ.भा. प्राच्यविद्यासम्मेलनस्य चतुश्चत्वारिंशत्तमेऽधिवेशने

१. चतुश्चत्वारिंशत्तमधिवेशनस्य महाध्यक्षेण प्रो.सतीशचन्द्रझामहाभागेन सह डा.रमाकान्तशुक्लः, २. 'शारदा' कारः पं.वसन्त अनन्त गाडगीळः अर्वाचीनसंस्कृतस्य सम्पादकाय डा.रमाकान्तशुक्लाय 'शारदा' पत्रिकायाः नवीनतममङ्कं समर्पितवान्, ३. अधिवेशने समागतैःप्रतिनिधिभिः (वामतो दक्षिणम्) प्रो.कृष्णमुरारीशर्म-डा.धनराजशर्म-प्रो.मिथिलाप्रसादत्रिपाठि-पं.वसन्तअनन्तगाडगीळ- प्रो.ब्रजबिहारीचौबे-महाभागैः सह डा. रमाकान्तशुक्लः, ४. सांस्कृतिककार्यक्रमस्य दृश्यम्। (२८.०७.२००८)

२. विदिशायां संस्कृतगौरवदिवसमहोत्सवः

02-04.08.2008 तमेषु दिनाङ्केषु विदिशानगर्यां जालौरीगार्डनसभाभवने उज्जयिनीस्थकालिदाससंस्कृतअकादम्या संस्कृतगौरवदिवसमहोत्सवः समायोजितः यत्र शोधपत्रवाचनगोष्ठी भजनसन्ध्या भारतनाट्यनृत्यप्रदर्शनं संस्कृतकवितापाठश्च अन्वष्ठीयन्त।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



उद्घाटनसमारोहे डा.विश्वासः, डा.भूपालसिंह, डा.रमाकान्तशुक्लः
प्रो.मिथिलाप्रसादत्रिपाठी (०२.०८.२००८)

अकादम्या निदेशकेन प्रो.मिथिलाप्रसादत्रिपाठिनोक्तं यत्-विदिशायाः समीपे स्थितं गोन्दलसंज्ञकं ग्रामं केचन विद्वांसः पतञ्जलेर्जन्मभूमिं गोनर्दं मन्यन्ते। अत एव विदिशायां स्थित्वा पतञ्जलेः स्मरणं सविशेषं कर्तुमवसरो लभ्यते। अत एवास्मिन् समारोहे पातञ्जलमहाभाष्यमवलम्ब्य विशेषचर्चा आयोजिता। उद्घाटनसमारोहेऽध्यक्षत्वेन अर्वाचीनसंस्कृतस्य प्रधानसम्पादको डा.रमाकान्तशुक्लः (दिल्लीतः) मुख्यातिथित्वेन बरकतुल्लाविश्वविद्यालय कुलपतिः डा.भूपालसिंहः (भोपालतः) सारस्वतातिथित्वेन च संस्कृतसम्भाषणसन्देश सम्पादकः-डा.विश्वासः समुपस्थितः। प्रो.त्रिपाठिना एतेभ्यः उत्तरीयाणि अकादमीप्रकाशिताग्रन्थाश्च समर्पिताः। समारोहे पञ्चदशशोधपत्राणां वाचनमभूत्। उद्घाटनसमारोहे समुपस्थितैः सर्वैरपि छात्रैः अभ्यागतैश्च सम्मिल्य डा.शुक्लेन 'भाति मे भारतम्' गीतम्। डा.चन्द्रगुप्तश्रीधरवर्णेकर- डा.नीलकण्ठ, डा.लक्ष्मीनिवास पाण्डेय- डा.चन्द्रभूषणझा- डा.हरीराममिश्र प्रभृतिभिर्विद्वद्भिर्व्याकरण-साहित्यदर्शनशिक्षाशास्त्रपरकाणि शोधपत्राणि पठितानि।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पुण्यपत्तनतः प्राप्ता कु. श्वेताप्रचण्डेमहाभागा भरतनाट्यं प्रदर्शितवती। टीकमगढतः समागतेन श्रीपवनतिवारिणा भजनानि गीतानि।

३. उत्तराखण्डसंस्कृतअकादम्या संस्कृतकविसम्मेलनमायोजितम्

14.08.2008 तमे दिनाङ्के उत्तराखण्डसंस्कृतअकादम्या हरिद्वारे, संस्कृत भवने संस्कृतदिवसमुपलक्ष्य अ.भा. संस्कृतकविसम्मेलनमायोजितम् यस्या ध्यक्षता पतञ्जलियोगपीठस्य आचार्यबालकृष्णमहाभागेन निर्व्यूढा। डा.'अभिराज'राजेन्द्रमिश्रः, डा.रामेश्वरदत्तशर्मा, आचार्यबुद्धिवल्लभशास्त्री च अकादमीपक्षतः तदुपाध्यक्षेण प्रो.महावीरअग्रवालेन उत्तरीयार्पणेन अभिनन्दिताः। मुख्यातिथिना राज्य-योजना-आयोगस्य उपाध्यक्षेण श्री मनोहर कान्तध्यानी- महाभागेन सम्मेलनस्योद्घाटनं कृतम्। विशिष्टातिथिरूपेण उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः डा.सुधारानी पाण्डेय महाभागा हरियाणासंस्कृतअकादम्याः सचिवः डा.रामेश्वरदत्तशर्मा समुपस्थितौ।

अकादमीसचिवेन डा.बुद्धदेवशर्मणा कवीनां स्वागतं कृतम्। डा.प्रकाशचन्द्र पंतेन सञ्चालनं कृतम्। डा.रमाकान्तशुक्लः, डा.प्रशस्यमित्रशास्त्री, डा. इच्छारामद्विवेदी 'प्रणवः', डा.जनार्दनप्रसादपाण्डेय 'मणिः', डा.कीर्तिवल्लभ शक्टा, डा.नवलता, डा.रामसुमेरयादवः, डा.हरिदत्तशमा, डा.कृष्णमुरारीशर्मा, डा.लक्ष्मीचन्द्रशास्त्री, डा.हरिगोपालशास्त्री, डा.रामविनयसिंहः, डा.राधेश्यामसेमवालः, श्रीसर्वेशतिवारी च काव्यपाठमकुर्वन्। आस्थाचैनलतः 16.08.2008 तमे दिनाङ्के संस्कृतदिवसे रात्रौ 9:40 तः 10:10 यावत् किञ्च 10:40 तः 12:40 यावत् कविसम्मेलनस्यास्य अविकलं प्रसारणममभूत्।

४. राष्ट्रियसंस्कृतसंस्थाने संस्कृतसप्ताहमहोत्सवः

नवदिल्ल्यां 16.08.2008 तम दिनाङ्कात् 21.08.2008 दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानेन स्वसभागारे संस्कृतदिवसमुपलक्ष्य सप्ताहावधिकाः विविधकार्यक्रमा आयोजिताः। 16.08.2008 तमे दिनाङ्के राष्ट्रियसंग्रहालये संस्कृतदिवसः सम्मानितोऽभूत्। 18.08.2008 तमे दिनाङ्के विद्यालयस्तरीया स्तोत्रपाठस्पर्धा समायोज्यत। 19.08.2008 तमे दिनाङ्के विद्यालयस्तरीया भाषणस्पर्धा अनुष्ठिताऽभूत्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.



'कविसपर्या' कार्यक्रमे (वामतो दक्षिणं) श्रीमती रमा शुक्ला, डा. मञ्जुलता शर्मा, प्रो.हरिदत्तशर्मा, प्रो.'अभिराज' राजेन्द्रमिश्रः, कुलपतिः प्रो.राधावल्लभत्रिपाठी, डा.रमाकान्तशुक्लः, डा.हर्षदेवमाधवः, डा.इच्छारामद्विवेदी 'प्रणव'श्च। (२०.०८.२००८)

20.08.2008 तमे दिनाङ्के आयोजिते 'कविसपर्या' कार्यक्रमे डा. रमाकान्तशुक्लः सम्माननीयकविरूपेण राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना प्रो.राधावल्लभत्रिपाठिमहाभागेन माल्यश्रीफलोत्तरीयैः सम्मानितः। सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना प्रो.'अभिराज'राजेन्द्रमिश्रेण, इलाहाबाद विश्वविद्यालयस्य संस्कृततिभागे आचार्येण प्रो. हरिदत्तशर्मणा, गुजरातविश्वविद्यालयस्य एच. के. आर्ट महाविद्यालये संस्कृतविभागे आचार्येण प्रो.हर्षदेवमाधवेन, आगराविश्वविद्यालयस्य सेण्टजोन्समहाविद्यालये संस्कृतविभागप्रवाचिकया श्रीमत्या डा.मञ्जुलताशर्ममहाभागया किञ्च नवदेहलीस्थश्रीला.बा.शा.रा.सं.विद्यापीठे पुराणेतिहासविभागाध्यक्षेण डा.इच्छारामद्विवेदिमहाभागेन डा.रमाकान्तशुक्लस्य संस्कृतरचनाः अवलम्ब्य विचाराः प्रकटिताः। डा.शुक्लेन स्वसंस्कृतरचना अवलम्ब्य संक्षेपेण अभिभाषितम्। तेन केचन काव्यांशाः अपि श्राविताः। अस्य कार्यक्रमस्याध्यक्ष्यं संस्थानस्य कुलपतिना प्रो.राधावल्लभत्रिपाठिना निर्व्यूढम्। अस्य कार्यक्रमस्य

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

दूरदर्शनतः 20.10.2008 तमे दिनाङ्के सायं 7:00 वादने सम्पादितानामंशानां प्रसारणं डी.डी.भारती चैनलेऽभूत्।

21.08.2008 तमे दिनाङ्के विद्वत्सपर्याकार्यक्रमे विश्रुतविदुषः प्रो. गोविन्दचन्द्रपाण्डेमहोदयस्य सम्मानः समभूत्। तस्य व्यक्तित्वं कर्तृत्वञ्चावलम्ब्य जयपुरस्थेन सुप्रसिद्धेन दार्शनिकेन श्रीयशदेवशल्येन, काशीहिन्दू विश्वविद्यालयस्य आचार्येण डा.सच्चिदानन्दमिश्रेण नवदेहलीस्थ-आई.आई. टी.-संस्थायाम् आचार्येण डा.वागीशशुक्लेन सागरस्थहरिसिंहगौरविश्वविद्यालये आचार्येण डा.अम्बिकादत्तशर्मणा चाभिभाषितम्। 21.08.2008 तमे दिनाङ्के पुरस्कारवितरणमभवत् यत्र मुख्यातिथिरूपेण भारतशासनस्य मानवसंसाधन विकासमन्त्रालये उपमहानिदेशकः डा.विजयप्रकाशगोयलः अध्यक्षरूपेण च राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो.राधावल्लभत्रिपाठी समुपस्थितः।

सप्ताहव्यापिनि महोत्सवेऽस्मिन् राजधान्याः नैके विद्वांसः विदुष्यश्च समुपातिष्ठन्।

५. नवनियुक्ताः संस्कृतकुलपतयः

1. प्रो. वेम्पटिकुटुम्बशास्त्री 03.08.2008 तमे दिनाङ्के सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य कुलपतिपदस्य कार्यभारमग्रहीत्।

2. प्रो.राधावल्लभत्रिपाठी राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदस्य कार्यभारं 14.08.2008 तमे दिनाङ्के अग्रहीत्।

3. प्रो.जुगलकिशोरःमिश्रः जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृत- विश्वविद्यालयस्यः कुलपतिपदस्य कार्यभारं 11.09.2008 तमे दिनाङ्के अग्रहीत्।

६. आचार्यडा.महेशचन्द्रशर्मणः पुस्तकद्वयस्य लोकार्पणम्

25.09.2008 तमे दिनाङ्के रायपुरे छत्तीसगढराज्यस्य मुख्य-मन्त्रिणा डा.रमनसिंहेन आचार्यडा. महेशचन्द्रशर्मणा लिखितयोः किञ्च छत्तीसगढराज्य हिन्दीग्रन्थअकादम्या प्रकाशितयोः 'संस्कृतसुरभि'-'मित्रलाभ' नाम्नोर्ग्रन्थयोर्लोकार्पणं कृतम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

छत्तीसगढ- अस्मिताप्रतिष्ठानद्वारा आयोजितेऽस्मिन् कार्यक्रमे मुख्यमन्त्रिणा डा.शर्मा वर्धापितः।

14.09.2008 तमे दिनाङ्के रायपुरनगरे छत्तीसगढराष्ट्रभाषाप्रचारसमित्या डा.शर्मा राष्ट्रभाषा-अलंकरणेन सम्मानितः।

७. राष्ट्रियसंस्कृतसंस्थानस्य स्थापनादिवससमारोहः

15.10.2008 तमे दिनाङ्के राष्ट्रियसंस्कृतसंस्थानसभागारे संस्थानस्य स्थापनादिवससमारोहः सम्मानितोऽभूत्। अस्मिन्नवसरे संस्थानस्य कुलपतिना प्रो.राधावल्लभत्रिपाठिना संस्थानपक्षतः संस्थानस्य संस्थापकनिदेशकाय आचार्य रामकरणशर्मणे अभिनन्दनपत्रं सोत्तरीयश्रीफलपुष्पगुच्छं समर्पितम्। संस्कृतहिन्द्योः अन्तःसम्बन्धमभिलक्ष्य प्रो.नामवरसिंहेन अभिभाषितम्। अस्मिन्नवसरे प्रो.रमारञ्जनमुखर्जी, प्रो.सत्यव्रतशास्त्री, डा.गौतमपटेलः, डा.रीताचटर्जी, डा.'अभिराज'राजेन्द्र मिश्रः, डा.रमाकान्त शुक्लः, डा.काशीनाथतिवारी, अन्ये चानेके विद्वांसः समुपातिष्ठन्। डा.रत्नमोहनझा सञ्चालनं डा.प्रकाशपाण्डेयश्च धन्यवादज्ञापनमकरोत्।

८. लक्ष्मीबाईमहाविद्यालयेन श्लोकावृत्तिः चित्रकर्म चायोजिते

दिल्लीविश्वविद्यालयस्य लक्ष्मीबाईमहाविद्यालये तत्रस्थसंस्कृतपरिषदा 23.10.2008 तमे दिनाङ्के प्रतियोगिताद्वयमायोजितम्। श्लोकावृत्तिप्रतियोगितायां आचार्यश्रीनिवासरथस्य कविता **'तदेव गगनं सैव धरा'** सप्तदशप्रतियोगिभिः प्रस्तुता। प्रथमपुरस्कारं हिन्दूमहाविद्यालयस्य ऋषिराजपाठकः, द्वितीयपुरस्कारं लक्ष्मीबाईमहाविद्यालयस्य रजनी, तृतीयं च पुरस्कारं मिराण्डाहाउस महाविद्यालयस्य ऋचा अवाप्नोत्। चित्रकर्मप्रतियोगितायां शिवराजविजयस्य दृश्यं चित्राङ्कनार्थं निर्धारितमासीत्। अष्टादशप्रतियोगिभिः सद्यश्चित्राङ्कन-प्रतियोगितायां भागो गृहीतः। प्रथमपुरस्कारमिन्द्रप्रस्थमहाविद्यालयस्य हेमा, द्वितीयपुरस्कारं लक्ष्मीबाईमहाविद्यालयस्य निशा, तृतीयपुरस्कारं हंसराजमहाविद्यलस्य कु. सोनू अवाप्नोत्। श्लोकावृत्तिप्रतियोगितायाश्चलवैजयन्तीं हिन्दूमहाविद्यालयः, चित्रकर्मप्रतियोगितायाश्च चलवैजयन्तीम् इन्द्रप्रस्थ-महाविद्यालयः अवाप्नोत्। श्रीमती शशिप्रभागोयलमहाभागा डा.रमाकान्त शुक्लश्च निर्णयकत्वेन उपस्थितौ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतसाहित्यपरिषदोऽध्यक्षा रजनी उपस्थितेभ्योऽतिथिभ्यः स्वागतं व्याहृतवती। सचिवपदम् अलङ्कुर्वती नीतूराजपूतमहोदया धन्यवादं ज्ञापितवती। डा.पुष्पा गुप्ता, डा.अनीता शर्मा च कार्यक्रमस्यास्य संयोजनं कृतवत्यौ।

९. प्रो.मीनाक्षीजोशी-प्रणीतग्रन्थस्य लोकार्पणम्

इन्दौरनगरे 11.10.2008 तमे दिनाङ्के 'शान्तिमण्डपम्, नाथ मन्दिर रोड' इत्यत्र डा.मीनाक्षीजोशी-महाभागया प्रणीतस्य **'कौटिलीय राज्यशास्त्रे'** तिनाम्नो ग्रन्थस्य लोकार्पणममूत्। सृष्टि जोशी सरस्वतीवन्दनां कृतवती। ग्रन्थकर्त्र्याः मात्रा श्रीमत्या उर्मिलाबरगलेमहाभागया अतिथीनां स्वागतं कृतम्। समारोहाध्यक्षेण डा.रमाकान्तशुक्लेन, मुख्यातिथिना डा.भास्कराचार्य-त्रिपाठिना सारस्वतातिथिभ्यां डा.इच्छारामद्विवेदी- डा.रामविनयसिंहाभ्यां च ग्रन्थमवलम्ब्य विचाराः प्रकटिताः। डा.शुक्लेन 'भाति मे भारतम्' डा. रामविनयसिंहेन च संस्कृतघनाक्षरी श्राविते। कार्यक्रमस्य सञ्चालनं डा. मृदुला बिल्लोरे कृतवती। (मुनिराजःपाठकः)

भवतां पत्रम्

199 वैशाली इन्क्लेव, पीतमपुरा, दिल्ली-88

प्रधासम्पादकमहाभागाः

प्राप्ता मया अर्वाचीनसंस्कृतस्य 2008 मितस्य ईसवीयसंवत्सरस्य त्रयः अङ्काः। अन्तिमे अङ्के **सुखसञ्चारिणी क्रान्तिरिति** मे लघुकाव्यं (काव्यकं वा) प्रकाशितमिति पठित्वा हर्षातिरेको जातः। भवद्भिः यद् उक्तं (पत्रे लिखितं) तत् कृतम्। धन्यवादाः।

इदं मे काव्यं संस्कृतपत्रिकासु न प्रकाश्यते इति विचिन्त्य मया महता सङ्कोचेन भवतां समीपे प्रेषितम्। प्रकाश्य भवद्भिः उपकृतोऽहम्।

पठितं मया **परमाण्वनुबन्ध** इति भवतां काव्यम्। भवद्भिः सुष्ठु च सत्यं च लिखितं यत् मनमोहन-बुशयोः यशःपताका स्वरूपोऽसीति। वस्तुतः परमाण्वनुबन्धः तयोः पताकारूपेण भारतदेशे तिष्ठति। दुर्भाग्यस्य विषयोऽयम् यत् तस्यां पताकायां लोष्ठप्रहाराणां प्रस्तरप्रहाराणां च संख्या न्यूनीजाता। ईस्ट इण्डिया कम्पनीवत् एषः परमाण्वनुबन्धो भारतस्य पराधीनतां दृढीकरिष्यतीति मे मतम्। यदि भारतीया उत्तिष्ठन्तु, अद्यापि अनुबन्धमेतम् अपाकर्तुं अर्हन्तीति मे दृढो विश्वासः।

अभिनवहितोपदेश इति काव्ये भवद्भिः व्यंग्यप्रहारेण बालोचितोपदेशाः कृता। ते अत्यन्तं शिक्षाप्रदाः। तत्र विंशे श्लोके भवद्भिः लिखितं-

गृहीतशस्त्रो व्रज दस्युतामथो शताधिकब्राह्ममारणोद्यतः।
भव त्वमातंककृतां वशंवदः तदास्तु चर्चा तव पुत्र माध्यमे॥२०॥

अस्मिन् श्लोके भवद्भिः वार्तापत्र-दूरदर्शन-पत्रकाराणां प्रवृत्तिम् अवलोक्य एव लिखितम्। वस्तुतः ब्राह्मणानां च मारणे दलितानां वा मारणे अधिकतरा चर्चा भवति, अन्येषां, मारणे यथा क्षत्रियाणां वैश्यानां कृषकाणां श्रमिकाणां वा न तथाविधा विस्तृता चर्चा भवति। अस्मिन् विषये न लेशमात्रमपि जातीयता जाति-निष्ठता वा वर्तते। वस्तुस्थितिः एषा एव अद्यतने भारते देशे। कारणं स्पष्टमेव। ब्राह्मणानां दलितानां च रुधिरः गाढतरो भवतीति निवेदयति संघसेनो दिल्लीस्थ।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

देववाणी-परिषद्, दिल्ली

आर.६, वाणी विहार, नई दिल्ली-११००५९

दिनांकः 25.10.2008

सूचना

देववाणी-परिषदः कार्यसमितेः, निर्वाचनमण्डलस्य साधारणसभायाश्च उपवेशनानि 24.12.2008 तमे दिनाङ्के 10:00 वादनतः 'आर.6, वाणी विहार, नई दिल्ली-110059' इत्यत्र आनुपूव्यां सम्पत्स्यन्ते। विचारविषयास्त्वित्थं सन्ति-

कार्यसमितेर्विचारविषयः

1. विगतोपवेशन-विवरण-पुष्टिः
2. आयव्ययोपस्थापनम्
3. आगामिवर्षस्य कृते अंकेक्षकस्य नियुक्तिः
4. अन्यः कश्चिद्विषयोऽध्यक्षानुमत्या

निर्वाचनमण्डलस्य विचारविषयः

1. आगामिकार्यसमितिनिर्वाचनम्
2. अन्यः कश्चिद्विषयोऽध्यक्षानुमत्या

साधारणसभायाः विचारविषयः

1. आयव्ययविवरणस्वीकारः
2. वार्षिकविवरणप्रस्तुतिः
3. अंकेक्षकनियुक्तिस्वीकरणम्
4. अन्यः कश्चिद्विषयोऽध्यक्षानुमत्या

सर्वेषां सदस्यानां यथाकालस्थानमुपस्थितिः प्रार्थ्यते।

(रमाकान्तशुक्लः)
महासचिवः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

संस्कृतगौरवगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत-विभागः
पंजाबी-विश्वविद्यालयः,
पटियाला-147002 (पंजाब)।

जीवने नो श्वसनं संस्कृतं विना
संस्कृतौ नो शरणं संस्कृतं विना।

ग्राम एतादृशे मे वासो भवेत्,
यत्र नो स्याद् वचनं संस्कृतं विना।

संस्कृतं स्याद् हृद्यं जनानां बहु,
भारते नो भवनं संस्कृतं विना।

परिपक्वता शुद्धता खलु ये गिरः,
क्षमं नो तत्कथनं संस्कृतं विना।

गिरां नित्यं निजैर्गुणैर्मातृसमम्,
कृतङ्केन पोषणं संस्कृतं विना।

यक्षप्रश्नेषु बौद्धिकगरिमवहम्,
कुत्रास्ति निदर्शनं संस्कृतं विना।

यच्च कैवल्यकलितं परमं पदम्,
न च तस्याधिगमनं संस्कृतं विना।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

काव्यरहस्यगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत - विभागः
पंजाबी - विश्वविद्यालयः,
पटियाला - 147002 (पंजाब)।

नैव वाचा नो लेखनेन कविता भवति,
सस्मितं प्रेम्णा वीक्षणेन कविता भवति।

पंक्तयो बहुशः कविभिः पुस्तके लिखिताः,
सहृदयचेतसा वरणेन कविता भवति।

येन सह विद्यते सघनो रागो मनसः,
तेन सह समययापनेन कविता भवति।

साधनापथे यदा सिद्धः समाधिर्भवति,
तेन चिन्मयेन प्रकाशेन कविता भवति।

कवयोऽनेके परं मे मतमपि शृण्वन्तु,
'भाति मे भारतं' रचनेन कविता भवति।

राष्ट्ररक्षायै यदाऽर्पितो वीरो भवति,
तेन हुतात्मनो गौरवेण कविता भवति।

कागदे प्रत्यहं व्यर्थं लिखामि किमपि,
कोऽपि यदि गायति सुकण्ठेन कविता भवति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

चन्द्रभवनगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत - विभागः
पंजाबी - विश्वविद्यालयः,
पटियाला - 147002 (पंजाब)।

चारुचन्द्रे मे भवनं भवतु,
चन्द्रवदना च नंदनं भवतु।
काव्यगोष्ठी सदा विज्ञकथा,
अप्सरोहस्ते व्यजनं भवतु।
संस्कृतं स्यान्नापरा भाषा,
वेदगीतादेः पठनं भवतु।
दिव्यलोकाः समीपे च सदा,
तारके सकले भ्रमणं भवतु।
बालैः सार्धमधीयानाः शुकाः,
पाणिनेः सततभ्यसनं भवतु।
न सिताः केशा न महो नाशः,
शोभनं यौवनं चिरं भवतु।
सम्मुखं ब्रह्म च हरिश्च हरः,
सर्वदा देवदर्शनं भवतु।
सभ्यता सा याऽऽर्षभावपरा,
सर्वहितनीतेः प्रथनं भवतु।
राष्ट्रभक्ताः स्युः समे दृश्याः,
त्रिरंगकेतूत्तोलनं भवतु।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मिलनगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत - विभागः
पंजाबी - विश्वविद्यालयः,
पटियाला - 147002 (पंजाब)।

मनो मिलनेन मे चन्दनायते,
प्रीतिवचसा पुनः पुष्करायते।

या दशा विहगरवेन शारवायाः,
तनुर्मे तथा सखे पुलकायते।

मधुर्तौ यथा प्रसन्न आरामः,
अन्तःकरणं तथा ललितायते।

शीतलः पवनः प्रीतिगन्धभरः,
नदसमसमयगतिः तरङ्गायते।

रसालकुञ्जेषु गुञ्जिता भ्रमराः,
घर्मे गगनं मुदा वर्षायते।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकवृत्तगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत - विभागः
पंजाबी - विश्वविद्यालयः,
पटियाला - 147002 (पंजाब)।

पीडापरीतः क्वचिद् हर्षेण पूरितः,
सरित्तरङ्गनौगतो मनुजो हि दोलितः।

घनागमेऽपि वारिदो न वर्षति यत् स्थले,
प्रियतमोऽनेकेषां केन तत्र प्रेषितः।

सुखसंपदामाप्तये श्रमशालिता वृता,
कुर्यात् किं नरो यदा भाग्येन वञ्चितः।

अल्पेनैव तुष्टो गृहे सुखेन वसति स्म,
अधिकाय स गतो बहिस्सर्वस्वलुण्ठितः।

केन सह सदा भुवि वासो विधीयते,
तथापि सङ्गरचनया लोको विमोहितः।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवलक्ष्यगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत - विभागः
पंजाबी - विश्वविद्यालयः,
पटियाला - 147002 (पंजाब)।

बृहत्तारुरवलोकितश्छायं विना,
यथा भ्रमति घनः कोऽपि तोयं विना।

तेषामाश्वासनं खकुसुमायते,
यथा वन्ध्यादारकः कायं विना।

तेषां क्षेत्रेष्वाम्राणि बहूनि खलु,
परं गन्तुं न शक्यं गर्तं विना।

रविर्भासा ददाति समेभ्यः सुखम्
अमितवर्षेभ्यः नभसि स्वार्थं विना।

तेषां फलपादपोऽश्मवर्षायते,
तत्र घटितं नो किमपि क्रौर्यं विना।

निजलक्ष्यस्य स्वयमेव साधको भव,
सफलो नो हि नरो निजशौर्यं विना।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

जीवनदर्शनगीतिः

प्रो.इन्द्रमोहनसिंहः
संस्कृत-विभागः, पंजाबी-विश्वविद्यालयः,
पटियाला-147002 (पंजाब)।

जीवनस्य दर्शनं पुस्तकैर्नो निश्चितङ्कुर्यात्,
आत्मगतानुभवैर्निजाध्वानं प्रकाशितङ्कुर्यात्।

कक्षायां शास्त्रिभिः पाठितं यथा तथा नो जगत्,
श्रेयसे किन्तु सखे सततं हृदा प्रयासङ्कुर्यात्।

चन्द्रिका नभसि यदा निकाये च कः पठने निरतः,
ईशसौन्दर्यहृद आत्मानं निमज्जितङ्कुर्यात्।

चन्दने सुरभिर्नहि वल्लरी च दलैस्सुमैर्हीना,
वाटिकारक्षकश्चकितः कथं विश्वासङ्कुर्यात्।

अर्णवे नौकागतो जनस्तरणं यदि न जानाति,
निमज्जनस्य कठिनक्षणे कस्तं रक्षितङ्कुर्यात्।

वृद्धाः कथयन्ति सदा रे एवं कुरु एवं न कुरु,
सम्मुखमों कथय चानन्तरं त्वमभीप्सितङ्कुर्यात्।

सिद्धिप्रदा भवति सदा वाणी च शर्करायुक्ता,
मधुरेण वचसा सखे सदा जनैर्भाषितङ्कुर्यात्।

देशसदृशी नहि सम्पदा यत्र जीवामस्ससुखम्,
अस्य रक्षाकृते सर्वस्वञ्च समर्पितङ्कुर्यात्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

मानवानां कृते पादपः पाठयति

- डॉ. रामेश्वर प्रसाद गुप्तः
सेवानिवृत्तः संस्कृतप्राध्यापकः,
उद्योगविभागस्य समीपे,
सिविल लाइन्स, दतिया-475661 (म.प्र.)

मानवानां कृते पादपः पाठयति।
स्वं महत्त्वं जनान् ननु हि विज्ञापयति॥

जीवनं यापयेत्, नर! जगद्धेतवे,
कर्म नूनं भवेद्धि जगद्धेतवे।
स्वार्थसिद्धिस्तु हेया भवति सर्वदा,
दानवृत्तिः सुगेया भवति सर्वदा।
ननु हि धर्मं त्वयं सर्वदा ज्ञापयति।
मानवानां कृते पादपः पाठयति॥
कर्म कार्यं हि यत् तत्तु योगप्रदम्,
परहितं च भवति ननु हि नित्यं शुभम्।
शिवमनो ननु ददात्यत्र शान्तिं सुखम्,
लोकहितभावनायां तु ज्ञानं च शम्।
शुभविहीनो जनो हि भ्रमति भ्रामयति।
मानवानां कृते पादपः पाठयति॥
हे मनुज! स्वार्थवृत्तिं कुवृत्तिं च त्यज,
सत्यकर्माणि कुरु, परहितं चैव भज।
कुरु सदा श्रेयसे ननु शुभं सत्कृतिम्,
धारयाथो सदा निश्छलां निजमतिम्।
पादपे मानवं परहितं शिक्षयति।
मानवानां कृते पादपः पाठयति॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

॥ श्रीमद्राधावल्लभाऽभिनन्दनम् ॥

- प्रो. 'अभिराज' राजेन्द्रमिश्रः
सनराईज विला (वरिष्ठ मा.विद्यालय के पास)
लोअर समरहिल, शिमला-171005 (हि.प्र.).
दूरभाष:0177-6534607 मो.09418186968, 09218534607

स्वाध्यायोत्तमविग्रहो मतिमतां धुर्यस्सुहृद्धवत्सलः;;
आत्माऽन्विष्टपथाध्वनीन उदितः स्वीयैर्नु दिव्यैर्गुणैः।
दिल्ल्यामत्र हि शारदासुकृपया देवैस्समारोपितो
राधावल्लभवल्लभो विजयते साहित्यकल्पद्रुमः॥१॥

यातास्ते किल कण्टनिष्कुटदरीविश्रान्तिलब्धोत्सवा
विक्षिप्ता मरुमारुताः प्रणयिनश्शाखोटशाखाभृताम्।
सम्प्रत्यत्र सुमाऽसवार्थिमधुपव्राताऽदरेऽहर्निशं
व्यग्रः कश्चिदुदेति चम्पकतरुर्वासन्तवाटीवटुः॥२॥

यद्वाणी वरवर्णिनीव रुचिरा हृद्याऽनवद्योज्ज्वला
नव्यैर्लोककथाक्रमैः सहृदयं सोत्कं करोत्युन्मदम्।
सोऽयं चित्तपबान्धवो विजयते विन्ध्याद्रिसन्मार्मिको
राधावल्लभनामधेयमहितः साहित्यनौश्रीवरः॥३॥

अम्भोधौ विनिमज्जितोऽपि गतवान् यो रत्नसन्धुर्यतां
शैतल्यञ्च दृगग्नितापविधुरे भाले भवस्यादधे
सर्वत्राऽपि बभौ परं स रजनीसौभाग्यहेतुर्विधुः
राधावल्लभतामुपेत्य कविताऽलङ्कारचर्चास्पदम्॥

नित्यं प्रेक्ष्य मुखच्छविं वसुमतीं संवेदनादर्पणे
योऽतिक्राम्य शिशुत्वसंविदनघं सौम्यं स्फुरद्यौवनम्।
जातः प्रौढिविकस्वरो नववयस्येवाऽकरस्सम्पदां
जीव्यात्साधु शतं समाः कुलपतिः सोऽस्मन्मनोवल्लभः॥

कुलमुख्यपदारूढं प्रेक्ष्य बन्धुं गुणाकरम्।
मिश्रोऽभिराजराजेन्द्रो वल्लभं स्तौति सद्गुणैः॥
कौलपत्यमभूद्धन्यं नूनं यस्य प्रतिष्ठया।
स विन्देत शतायुष्यं वल्लभो लसतां सताम्॥

२०.०८.२००८ ई. जनकपुरी, नई दिल्ली-58

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

शिववीरिपरकं संस्कृत-साहित्यम्

-डा.अभिनवशुक्लः
आर.६, वाणी विहारः, नई दिल्ली-११००५९

कवीन्द्रपरमानन्दकृतं **शिवभारतम्** अनुपुराणनाम्ना शिवराजस्य समकालीनेन कवीन्द्रपरमानन्देन विरचितम्। अस्य 32 अध्यायाः इदानीमुपलभ्यन्ते ये 1930 तमे वर्षे आनन्दाश्रममुद्रणालयेन पुण्यपत्तनतः प्रकाशिताः। अस्य रचना पौराणिकशैल्यां विहिता।

श्रीशिवभारतस्य प्रथमाध्यायस्य नाम कुमारप्रभवः, द्वितीयस्य शाहशरीफपरिणयः, तृतीयस्य आकस्मिकास्कन्दनं, चतुर्थस्य निजामप्रकर्षः, पञ्चमस्य भगवत्प्रतिज्ञानं, षष्ठस्य शिवराजप्रभवः, सप्तमस्य शिशुलीलावर्णनं, अष्टमस्य निजामविलायः, नवमस्य कर्णाटविजयः, दशमस्य पुण्यदेशेश्वरत्वप्रदानं, एकादशस्य शाहस्य दुर्निमित्ताविर्भावः, द्वादशस्य शाहनिग्रहः, त्रयोदशस्य हैवतपुत्रवधः, चतुर्दशस्य मुसेखानवधः, पञ्चदशस्य दुर्गद्वयप्रदानं, षोडशस्य शिवं प्रति सुवर्णशर्मकृतोपदशः, सप्तदशस्य अफजलाभ्यागमः, अष्टादशस्य शिवं प्रत्यफजलसन्देशादेशनम्, एकोनविंशस्य अफजलप्रयाणं, विंशस्य अफजलागमनं, एकविंशस्य अफजलवधः, द्वाविंशस्य अफजलसैन्यभङ्गः, त्रयोविंशस्य प्रणालाद्रिग्रहः, चतुर्विंशस्य रुसस्तुमादिभङ्गः, पञ्चविंशस्य शास्ताखनाभ्यागमः, षड्विंशस्य स्वराष्ट्रावेक्षणं, सप्तविंशस्य स्वपुरप्रवेशः, अष्टाविंशस्य कारतलबसैन्यागमः, एकोनत्रिंशस्य कारतलबपराभवः, शृङ्गारपुरप्रवेशः अस्ति। द्वात्रिंशाध्यायस्य नव पद्यान्येव प्रकाशितानि। कवीन्द्रपरमानन्देनास्य ग्रन्थस्य अध्यायशतं कांक्षितमसीत्।

पुरुषोत्तमकविकृतं **'शिवकाव्यम्'** : पुरुषोत्तमकविना शिवकाव्यस्य प्रणयनं कृतम् यस्मिन् शिवाजीमहाराजादाभ्य द्वितीयपेशवाबाजीरावं यावत् मराठासाम्राज्यस्य इतिहासः वर्णितः। अस्य पाण्डुलिपिः बड़ौदाप्राच्यविद्या-प्रतिष्ठाने वर्तते।

मूलशङ्कर माणिक लाला याज्ञिकेन (31.01.1886-23.11.1965) **'छत्रपतिसाम्राज्यम्'** 1919 तमे वर्षे प्रणीतम्।

श्रीरङ्गाचार्येण **श्रीशिवराजविजयनामकं** नाटकं प्रणीतं यस्य प्रकाशनं संस्कृतसाहित्यपत्रिकायां 1938 तमे खैष्टेऽब्दे जातम्।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

श्रीनाथशास्त्रिणा हसूरकरेण **'शिवाजीमहाराजचरितं'** विरचितम्। श्रीहजारीलालशास्त्रिणा **शिवप्रतापविरुदावलीति** ग्रन्थे प्रतापविजयस्य **शिवराजविजयस्य** च शतककाव्यरूपेण रचना कृता। शिवराजविजये शिवाजीमहाराजस्य चित्रणं कृतम्।

डा.श्रीधरभास्करवर्णेकरेण **'श्रीशिवराज्योदयं'** नाम महाकाव्यमष्टपष्टिसर्गात्मकं प्रणीतम् यस्य प्रकाशनं 1972 तमे खैष्टेऽब्दे जातम्। प्रथममस्य प्रकाशनं 'शारदा' पत्रिकायां धारावाहिकरूपेण जातं तदनु पुस्तकाकारेण। अस्मिन् महाकाव्ये शिवाजे राज्यसिंहासनारोहणपर्यन्तं वृत्तमुपनिवद्धम्। अमुं ग्रन्थमवलम्ब्य प्रस्तुतपङ्क्तीनां लेखकेन शोधकार्यं दिल्लीविश्वविद्यालयतः कृतम् यस्य प्रकाशनं 2007 तमेऽब्दे **'श्रीधरभास्करवर्णेकर-कृत श्रीशिवराज्योदयम् महाकाव्य का साहित्यशास्त्रीय अध्ययन'** इतिशीर्षकेण प्रकाशनमपि जातम्।

शिवराजविजयस्य रचना अम्बिकादत्तव्यासेन 1895 तमे वर्षे 1901 तमे वर्षे तस्य ग्रन्थाकारेण प्रकाशनं सञ्जातम् गद्यकाव्यात्मकोऽयं ग्रन्थः उपन्यासशैलीमनुसरति।

शिववीरमवलम्ब्य श्रीधरभास्करवर्णेकरेण **शिवराजाभिषेकं** नाम नाटकं रचितम्।

हरिदास सिद्धान्त वागीशेन (1896-1962) 1945 तमे वर्षे दशाङ्कं नाटकं **'शिवाजीचरितम्'** प्रणीतम्।

डा.उमाशंकार त्रिपाठी छत्रपति चरितं नाम महाकाव्यमरचयत् यस्य प्रकाशनं। 1974 तमे वर्षे सञ्जजातम्। डा.उमाशङ्करत्रिपाठिनो जन्म 01.01.1922 तमे दिनाङ्के देवरिया- जनपदान्तर्गते सिगहानाम्नि ग्रामेऽभूत्। अयं ग्रामः कुशीनगरात् विंशतिमीलमुत्तरेण स्थितमस्ति। अस्य पिता पं.रामनरेशमणित्रिपाठी संस्कृतस्य मूर्धन्यविद्वत्सु अन्यतम आसीत्। कविना संस्कृतस्य ज्ञानं स्वपितुरेवार्जितम्। अनेन आंग्लसंस्कृतसाहित्ययोः एम.ए.-परीक्षा उत्तीर्णा आंग्लसाहित्ये च पी.एच.डी. उपाधिः प्राप्तः। अनेन साहित्याचार्यपरीक्षाप्युत्तीर्णा। काशीविद्यापीठे बहुकालं यावदननेन अंग्रेजीसाहित्यं स्नातकोत्तरकक्षासु अध्यापितम्।

डा.उमाशंकर त्रिपाठी **क्षत्रपतिचरितं** नाम महाकाव्यमरचयत् यस्य प्रकाशनं। 1974 तमे वर्षे सञ्जातम्। उत्तरप्रदेशशासनेन इदं महाकाव्यं

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

पञ्चसहस्ररूप्यकात्मकेन पुरस्कारेण सम्मानितम्। कवे रचना: सन्ति- 1. क्षत्रपतिचरितम् (महाकाव्यं) 2. उमरखय्यामभणिति: (उमरखय्यामकवे: रुबाईछन्दसां मन्दाक्रान्तावृत्तै: संस्कृतरूपान्तरम्) 3. संकृतामृतम् (महात्म-गान्धिन: पञ्चशत सूक्तीनां अनुष्टुप्छन्दसा संस्कृतरूपान्तरम्) 4. अहं राष्ट्री (राष्ट्रपुरुषान् राष्ट्रियविषयाँश्चाधृत्य प्रकीर्णकाव्यरचना) 5. भारतीगीतम् (आधुनिकवृत्तै: रचितानां संस्कृतगीतानां सङ्कलनम्) 6. रासभारती (विनोदपूर्णानि अन्योक्तिपरंकाणि संस्कृतकाव्यानि) 7. द महात्मा (महात्मगान्धिमाश्रित्य आंग्लभाषायां निबद्धा: कविता:) 8. उत्तरकाव्य प्रकाश (हिन्दीभाषायां पाश्चात्यालोचनासहित्यस्य समीक्षा) 9. अद्यतन (हिन्द्या अभिनवकविता) 10. बालू के कण (हिन्दीनिबन्धमाला) 11. अनद्यतन (हिन्दीकाव्यसुरभि:)।

क्षत्रपतिचरितस्य कथावस्तु-19 सर्गात्मकेऽस्मिन् महाकाव्ये शिवाजीमहाराजस्य चरितं वर्णितम्। अस्मिन् शिववीरस्य जीवनस्य प्रमुखयो: द्वयोर्घटनयो: प्रधानतो वर्णनम् विद्यते। पञ्चमसर्गात्- नवमसर्गं यावत् अफजलखानस्य अभियानं तस्य समातिप्श्च वर्णिता। द्वादशसर्गात् ~~पञ्चमसर्गात्- नवमसर्गं यावत्~~ क्षत्रपतिशिवाजे: आगरागमनम् औरङ्गजेब द्वारा तस्य निग्रहस्ततश्च तस्य पलायनं कृत्वा पुण्यनगरे आगमनम्। मन्ये काव्यं हृदयङ्गमं विधातुम् कविना यथास्थलं कल्पनापि कृता। अस्मिन् काव्ये पद्यानां संख्या 2293 अस्ति।

श्रीरामभि.वेलणकरस्यं **'छत्रपतिशिवाजीराज:'** 1974 तमे प्रकाशितोऽभूत्।

आचार्यश्रीरमेशचन्द्रशुक्लेन **'चारुचरितचर्चा'** नाम्नि ग्रन्थे **'छत्रपति: शिवाजी'** नाम्नि गद्यप्रबन्धे शिववीरस्य जीवनचरितं निबद्धम्। एकं पद्यमपि तत्र विरचितम्। तद्यथा-

बभूव नीत्यां कुशल: शिवाजि: शूरो महान् वैरिविनाशकारी।
नयेन शौर्येण च यो परास्तमौरङ्गजेबं तरसा चकार॥

अस्य ग्रन्थस्य प्रकाशनं 1977 तमेऽब्दे जातम्। एतदतिरिक्तं स्फुटकवितास्वपि शिवाजी चरितं वर्णतमस्ति।

1992 तमे वर्षे श्रीकृष्णदत्तशर्मशास्त्रिणा 'शिववीरचरितं' नाम महाकाव्यं प्रकाशितम्। शिवाजीपरकं संस्कृतसाहित्यमवलम्ब्य शोधकार्यस्यावश्यकतास्ति।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

नवप्रकाशन-चर्चा

ईसप-कथा-निकुञ्जम्[1]

ईसापूर्वं षष्ठे शतके यूनानदेशे वर्तमानेन ईसपेन पशून् पक्षिणश्च पात्रीकृत्य कंथानिर्माणस्य प्रयोगः कृतः।

ईसपस्य 111 कथाः कविरत्न-ओम्प्रकाशठाकुरेण सरलसंस्कृतेन रूपान्तरीकृत्य अस्मिन् ग्रन्थे संकलिताः। प्रत्येकं कथायाः अन्ते पद्येन कथाया उपदेशं प्रकाशयन् श्रीठाकुरः पञ्चतन्त्रीयपरम्परामनुपालयति। एवं 111 कथानामन्ते दत्तानि 111 पद्यानि सुभाषितरूपेण समुल्लसन्ति। दिङ्मात्रमुदाह्रियते-

स्वजातीयान् परित्यज्य यः परेषु च भक्तिमान्।
उभयत्र न सम्मानं लभतेऽसौ स्मयान्वितः॥

(परिभवमाप्नुते दृप्यन्, कथासंख्या 106, पृष्ठम् 230)

पाठकः एकवारं इदं पुस्तकम् स्वकरयोर्धृत्वा आद्यन्तं पठितमुत्सुको जायते। ग्रन्थकर्त्रा संस्कृतानभिज्ञानामुपकाराय कथानां हिन्द्यनुवादोऽपि प्रत्येकं कथानन्तरं दत्तः।

'शारदा'पत्रिकायाः ऊनपञ्चाशद्वर्षारम्भदीपावलीविशेषाङ्कः २००७[2]

'शारदा' पत्रिकया विगतेषूनपञ्चाशद्वर्षेषु बहूनि कीर्तिमानानि अर्जितानि। अस्यां पत्रिकायां सम्पादकप्रवरेण पं.वसन्तअनन्तगाडगीळमहाभागेन दीर्घकायाः ग्रन्थाः प्रकाशिताः। **श्रीशिवराज्योदय**सदृशं महाकाव्यमस्यामेव पत्रिकायां प्रकाशितं जातम्। अन्यान्यपि अनेकानि काव्यानि अस्यां पत्रिकायां प्राकाश्यमलभन्त यथा ग.बा. पळसुले कृतं-**विवेकानन्दचरितम्**, पं. वा. ना.औदुम्बरकरशास्त्रिविरचितम् **अप्पाशास्त्रिचरितम्**, डा.श्रीधरभास्कर-वर्णेकरप्रणीतं शिवराजाभिषेकम्, डा. ग.बा. पळसुले कृतं **वैनायकं** महाकाव्यम्, श्री प्रा. नालिनी साधले (पराडकर)- कृतं **श्रीतुलसीमानसनलिनम्**

1. **ईसप-कथा-निकुञ्जम्**, लेखकः- ओम्प्रकाशठाकुरः, प्रका. सुरभिप्रकाशनम् डी-957, सरस्वती विहार दिल्ली-110034, प्रथमं संस्करणम्, मार्च 2007, मूल्यम् 275/-

2. **'शारदा'**, सम्पादकः प्रकाशकश्च- पण्डितवसन्तअनन्तगाडगीळ, झेलम, पत्रकार नगरी पुण्यपत्तम् (पुणे) 411016, नवम्बर 2007, मूल्यम् 300/- रू.

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

इत्यादि।

ऊनपञ्चाशद्वर्षीयेऽङ्के श्रीसद्गुरुब्रह्मचैतन्यमहाराजगोंदवलेकराणां प्रवचनानि पण्डितउपाध्यायदुर्गारामशर्मणा संस्कृतेऽनूद्य 'श्रीनामभागवत' मिति शीर्षकेण प्रकाशितानि। द्वादशस्कन्धेषु विभक्तमिदं 'श्रीनामभागवतं' नामजपादिसम्बन्धिनो विचारान् अनुष्टुप्छन्दसा समुपस्थापयति। अस्मिम् ग्रन्थे नामशब्दः सर्वत्र भगवन्नामवाचकः, यथोक्तं-

नामशब्दोऽत्र सर्वत्र भगवन्नामवाचकः।
सर्वाणि देवनामानि साधनानि समानि हि॥
नामरूपः सन्धिरेष उभयोः शिवजीवयोः।
नाम्नः साधनता चाऽपि साध्यताऽपि च तस्य सा॥

अङ्कोऽयं नूनमेव संग्राह्यः, पठनीयो मननीयश्च।

मृगमृगेन्द्रान्योक्तिशतकम्[3]

डा.'अभिराज'राजेन्द्रमिश्रेण प्रणीतेऽस्मिन् मुक्तककाव्यसंग्रहे सप्तदशशीर्षकेषु मृगसम्बन्धिन्यः अन्योक्तयः विंशतिशीर्षकेषु च मृगेन्द्र (सिंह) सम्बन्धिन्यः अन्योक्तयः संकलिताः। सर्वासामपि अन्योक्तीनां मुद्रणं वामपृष्ठेषु कृतं दक्षिणपृष्ठेषु च अन्योक्तिषु अभिव्यक्तमर्थं प्रकाशयन्ति चित्राणि दत्तानि। दिङ्मात्रमुदाह्रियते-

१. शष्पाङ्कुराः समशितुं गिरिनिर्झराणां
पातुं जलानि तृणतल्पमलं निशेतुम्।
भोक्तुं च यौवनमदोद्धुरयूथमृग्यः
किं किं न भूपसुखमेणयुवा भुनक्ति॥
(मृगान्योक्तयः, सुखी मृगः।)

२. क्षुत्क्षामसिंहभुजपञ्जरमुक्तधात्री-
सङ्गच्युतो मृगशिशुः सदयं बुभुक्षुः।
सिंहीस्तनं झटिति पातुमियेष यावत्
साऽप्याशु वत्सलतया लिलिहे तमेव॥
(मृगेन्द्रान्योक्तयः, वत्सलो मृगेन्द्रः 58)

3. **मृगमृगेन्द्रान्योक्तिशतकम्**, प्रणेता- त्रिवेणीकविश्रीअभिराजराजेन्द्रमिश्रः

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सङ्कलनेऽस्मिन् शतं पद्यानि मृगमृगेन्द्रयोर्व्याजेन मानवसमाजस्य विविधाः भावस्थितीः परिस्थितीश्च समुद्घाटयन्ति।

कौटिलीय राज्यशास्त्र[4]

डा.मीनाक्षीजोशीमहाभागया अस्मिन् ग्रन्थे नवस्वध्यायेषु कौटिलीयमर्थशास्त्रमाधृत्य राज्योत्पत्तिः, राज्यस्वरूपम्, राज्यप्रकाशः शासनप्रणाल्यश्च, राज्यस्योद्देश्यानि कर्त्तव्यानि च, पौरजानपद-सभा-समिति-विदथादिराजनीतिकसंस्थाः, राज्यान्तरसम्बन्धः, दूतव्यवस्था तथा च विधि-न्याय-दण्डव्यवस्थाः सम्यगालोचिताः। लेखिकया कौटिल्यात् पूर्वं विद्यमानेषु ग्रन्थेषु सम्यक् निमज्य कौटिलीयार्थशास्त्रस्य पूर्वपीठिका अन्विष्टा। तया कौटिल्यस्य विशिष्टदृष्टेरपि परिचयो दत्तः, या हि शासनव्यवस्थायां कस्यापि धर्मविशेषस्य कृते न रागं समर्थयति नाऽपि द्वेषम्। इत्थं हि कौटिलीयं राज्यशास्त्रम् आधुनिक-शब्दावल्यां 'सेक्यूलर' पद्धतेः सूत्रधारत्वं भजते। अत एत्र अस्य ग्रन्थस्य महत्त्वं समस्तेऽपि संसारे स्वीक्रियते। डा. मीनाक्षी जोशीकृतं 'कौटिलीय राज्यशास्त्रं' ग्रन्थमधीत्य पाठको नूनमेव बुद्धिवैशद्यं लभते।

सुधर्मा[5]

कविवरश्रीरामकरणशर्मणो नूतनकाव्यसङ्ग्रहः 'सुधर्मा' शीर्षकेण प्रकाशितः। अत्र षोडश कविता विराजन्ते। प्रो. शर्मा महाभारतस्यास्ति गम्भीरोऽध्येता शोधकर्त्ता च। महाभारतस्यानुशीलनं काव्यबुद्धिं जनयतीति प्रसिद्धमेव। कविवरेण शर्मणा **'देवयानी'**, **'सत्यवतीपराशरीयम्'** **'राध**

शिमला, प्रका. श्रीभंद्रकरोदयशिक्षण ट्रस्ट गोधरा, प्रथमं मुद्रणम्, वि.सं. 2064, ई. सन् 2008, मूल्यम् 100/-

4. **कौटिलीय राज्यशास्त्र**, लेखिका- प्रो.मीनाक्षीजोशी, प्रका. अभिषेक प्रकाशन 5824 न्यू चन्द्रावल जवाहर नगर, दिल्ली-110007, प्रथमम् संस्करणम् 2007, मूल्यम् 800/- रू.

5. **सुधमा**, प्रणेता- रामकरणशर्मा, प्रका. प्रतिभा प्रकाशन 7259/20 अजेन्द्र मार्केट, प्रेम नगर, शक्तिनगर, दिल्ली-110007, प्रथमं संस्करण्-2008, मूल्यम् 250/-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

'**यो वाऽस्मि पार्थो वा**' इत्येता रचना महाभारतस्य पृष्ठभूमौ विरचिताः। अनेकासु रचनासु कवेरनुभवो भावना सन्देशश्च रमणीयतया प्रकाशिताः। '**निठारी-धरा कम्पते**'- इत्यस्यां कवितायां कवेः करुणा निठारीधरा-मुखेन स्फुटिता। निठारीमागत्यैकेन नेत्रा कथितमसीत् यदेवंविधा लघ्व्यो घटनास्तु प्रायो भवन्त्येव, न तत्राधिकः कोलाहलोऽस्त्युचितः। कवेर्मनो दूयते। निठारीधरा खगा गावो लता वृक्षकाश्च शिशुघातकान् निर्भत्सयन्तः मृतानां शिशूनां सन्दिष्टमित्थं तान् ब्रुवते-

भवान् मोदते हत्ययैवेदृशा चेद्
वयं निर्वृताः शेमहे भूमिकुक्षौ।
विषादो न नः कोऽपि चिन्ता न काचित्
सुदूयामहे केवलं युष्मदर्थम्।।
वयं गौरवं दध्महे नः कुलेऽस्मिन्
दधीचिश्च रामश्च कृष्णो विदेहः।
अनेके जगद्रक्षकास्ते त आसन्
इदानीं जगद्भक्षकाः स्थात्र यूयम्।।
सदा मज्जतो बूथ चादर्शवाणीः
सुवेषं च सोष्णीषमाधत्थ शुक्लम्।
मनः कीदृशं निर्मितं वो विधात्रा
विधाताऽपि नो वेद, मन्ये, कुतोऽन्ये।।

'सुधर्मा' शीर्षकं मुख्यरचनामनुसृत्य कृतमस्ति। एकादशसंख्याका रचना 'सुधर्मा' कवे रमणीयकल्पनाया प्रसूताः। यथा सर्वा अपि रचना कथात्मिका अत एव प्रबन्धात्मिका सन्ति तथैव 'सुधर्मा' अपि। 108 पद्यैः रचितायामस्यां कवितायां कविः कल्पनां करोति यद् देवगुरुवृहस्पतिरसुरगुरुः शुक्राचार्यश्चैकदा परस्परं विगृश्य युद्धं वारयितुं शान्तिञ्च स्थापयितुं सभामाहूतवन्तौ यत्र व्यासः संयोजकोऽभवत्, ऋषभ-महावीर-बुद्ध-स्वायम्भुव-कपिल-विश्वामित्र-पतञ्जलि-अभिनवगुप्त- कणाद-जैमिनि-गौतम-जनक-वसिष्ठ-वाल्मीकि-याज्ञवल्क्य- शङ्कर-कबीर-तुलसी-रामानुज-वल्लभाचार्य-रामानन्द-कम्बन्-विद्यापति-रसेल-गोरखनाथ-गौराङ्गमहाप्रभु-दादू-निम्बार्क-मार्क्स-फ्रायड-गान्धी-सहजानन्द-दयानन्द-अरविन्द-विवेकानन्दा आमन्त्रिता अभूवन्। ते च

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सर्वे निष्कर्षरूपेणेदमेव तथ्यमङ्गीचक्रुर्यत्सर्वैः प्रेमा एवालम्बनीयः। अद्यतननेतृणामपि स्वरूपं प्रसक्त्यानुप्रसक्त्या पाठकस्य पुरत आयाति

किन्तु नेतार एते महापण्डिताः
स्युर्विनीताः कथं लोकसेवाव्रताः।
किञ्चिदन्विष्यतां तच्चिकित्सौषधं
भेदकव्याधिरेषां यथा शाम्यतात्॥ ९३॥
विभाजनधना इमे जहतु सद्य एवाद्यतो
विभाजनपराः कृतीर्वचसि लेखने वा दले।
इमा जहति चेन्न ते जहतु ते स्वयं नेतृतां
समेत्य जनताऽश्विमां दिशतु घोषणां निर्भयम्॥९४॥

विचारविमर्शानन्तरं देवासुरसभा समाप्तिं गच्छति सर्वत्र च सौहार्दं प्रतिष्ठां लभते। कविर्भणति-

एवमवसिता संसद् देवासुरयोः समन्वयाधारा।
उभयोः समजनि मैत्री तैस्तैर्भावैर्नवा भव्या॥१०३॥
विगताः समे विवादाः संवादा एव सन्ततः परितः।
सौहार्दं च समत्वं सहता ममता क्षितौ वृद्धाः॥१०४॥
अलमिह शस्त्रवितानैः शास्त्रविवादैरलं निरर्थैस्तैः।
अलमिह नेतृभिरेभिः प्रेमैवाभून्नवः शास्ता॥१०५॥

सर्वा अपि कविताः पाठकानां भावपरिष्कारं कुर्वन्ति। अपि नाम नेतारो बुद्धिजीविनो वा एता : कविताः मूलरूपेण कस्यचिद्विदुषः साहाय्येन अनुवादरूपेण वा पठेयुः!

कथासरित्[6]

'कथासरित्' - इत्येतस्याः षाण्मासिक्याः पत्रिकायाः चतुर्थ-पञ्चमतरङ्गयोस्त्रिंशत्प्रायाः कथाः प्रकाशिता या बालोपयोगिन्यः, पौराणिक्यः, अनूदिताः मौलिक्यश्च सन्ति। अनेका कथाः आधुनिकपरिवेशं प्रकाशयन्ति। 'अभिराज' राजेन्द्रमिश्र- बनमालिविश्वाल-पराम्बाश्रीयोगमाया- सूर्यप्रकाशशुक्ल-

6. **कथासरित**, समकालिक संस्कृतकथानामद्वितीया षाण्मासिकी पत्रिका, प्रधानसम्पादकः अच्युतानन्ददाशः, सम्पादकौ-बनमालिविश्वालः नारायणदाशश्च। प्रका., कथाभारती 57, वसन्तविहारः, झूसी, इलाहाबाद-211019

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

सदानन्ददाश-नारायणदाश- सुकान्तसेनापति- हर्षदेवमाधव राधावल्लभत्रिपाठी-जगन्नाथ पाठक-अच्युतानन्ददाश- हरिहरशर्मा अर्याल- मानसशरणतिवारी-राधारमणपाण्डेय-प्रशस्यमित्रशास्त्री-प्रमोदकुमारनायकानां कथाः एतयोस्तरङ्गयोः प्रकाशिताः सन्ति। अर्चनातिवारीमहाभागया 'कथासरितः प्राक्तनास्तरङ्गा एकमाकलनम् इत्यस्मिन्नालेखे पूर्वप्रकाशितानामङ्कानां परिचयः प्रदत्तः। 'अभिराज'राजेन्द्रमिश्रेण सह या साक्षात्कारात्मिका वार्ता बनमालिविश्वालेन अर्चनातिवारिमहाभागया च कृता तस्याप्यत्र विवरणं प्रदत्तम्।

पत्रिकेयं चिरं जीवतु-इति काम्यते!

वाजिराउतः[७]

भारतवर्षस्य स्वातन्त्र्यसङ्ग्रामे ओडिशाराज्यस्यापि प्रभूतमवदानमस्ति। ओडिशाराज्यस्यढेङ्कानालमण्डले भारतस्य स्वतन्त्रतासङ्ग्रमे भागं गृह्णन् द्वादशवर्षीयो वाजिराउतनामा किशोर आंग्लारक्षिभिः 10.10.1938 तमे दिनाङ्के व्यापादितः । तस्मिन्नेव वर्षे (1938) सच्चिदानन्दराउतरायेण 'ओडिया' भाषायां 'वाजिराउते'तिकाव्यस्य प्रणयनं कृतम्। सहकारपत्रिकायामस्य प्रकाशनं 1938 तमे वर्षे जातम्। ततः 09.03.1941 तमे दिनाङ्केऽस्य पुस्तकाकारेण प्रकाशनं जातम्। सरोजिनीनायडूमहाभागायाः कनिष्ठभ्रात्रा श्रीहरीन्द्रनाथचट्टोपाध्यायेनास्य आङ्ग्लानुवादः 'The Boatman Boy and Other Poems' शीर्षकेण कृतः। अस्य काव्यस्यानेकानि संस्करणानि जातानि। 1977 तमे वर्षे प्रकाशितं संस्करणमनुसृत्य डा.नारायणदाशेनास्य काव्यस्य संस्कृते रूपान्तरणं कृतम्। 2004-2005 वर्षयोरस्य प्रकाशनं 'लोकसुश्री' - पत्रिकायां जातम्। तदनु पुस्तकाकारेणास्य प्रकाशनां 2006 तमेऽब्दे जातम्। वामपृष्ठेषु मूलकाव्यमस्ति दक्षिणपृष्ठेषु संस्कृतरूपान्तरमस्ति। सरलं संस्कृतम्, सरला शैली।

---

7. **वाजिराउतः**, ओडियामूलकविः-ज्ञानपीठपुरस्कारविजेता पद्मश्रीः सच्चिदानन्दराउतरायः, अनुसर्जकः प्रकाशकश्च डा.नारायणदाशः, चढियापल्ली पुरुषोत्तमपुरम्।, गञ्जामम्, ओडिशा-761018, प्रथमं संस्करणम् 2006, मूल्यम् 36/-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

आह्वानम्[8]

डा.राधेश्यामगंगवारेण त्रिषु भागेषुपञ्चाशीतिविषयानाश्रित्य पञ्चशतप्रायै-र्भुजङ्गप्रयातच्छन्दोभिः नीतिकाव्यम् 'आह्वानं' प्रणीय संस्कृत-सुभाषित-परम्परा अग्रे नीता। प्रसादगुणस्य सर्वेषु पद्येषु स्थितिरवलोक्यते। आतङ्कमवलम्ब्य पञ्चसु पद्येषु कविना स्वविचाराः प्रस्तुताः। दिङ्मात्रमुदाह्रियते-

स्वदेशस्य वैखण्डनं कामयन्ते
सरक्षाबलेन प्रतिस्पर्धमानाः।
भुशुण्डीप्रभावैश्च विस्फोटनैश्च
दधत्यत्र सत्त्वं महातङ्कवादाः॥ (आतंकः 2 पृ.8)

कविना अकारादिक्रमेण शीर्षकाणां विधानं कृतम्। प्रत्येकं विषयमधि कृत्य पञ्च श्लोकाश्च प्रणीताः। आद्यो विषयोऽस्ति-अतिथिः, सुखञ्च चरमो विषयः। धूमपानमवलम्ब्य कवेः कथनमस्ति-

प्रजागर्ति कासेन रात्रौ निशादो
जराजर्जरां देहयष्टिं बिभर्ति।
अधन्यो ध्रुवं दुर्मनस्को दुरन्तो
हितं वीक्षते नात्मनो नापरस्य॥ (धूमपानम् 8 पृ.45)

विवेकमञ्जरी[9]

डा.रामेश्वरदत्तशर्मणा त्रिंशच्छीर्षकेषु विविधा भावा विचाराश्च सङ्कलिताः। परमसत्तावबोधनं, धर्मावधारणं, मनःसमीक्षणं, कामविवेचनं, नरनार्यौ संस्कृतभाषासौष्ठवमित्याद्या विषया अत्र वर्ण्यन्ते। कविना हास्यव्यङ्ग्ययोरपि सृष्टिः कृता। भ्रष्टाचारमवलम्ब्य कविः कथयति-

भोज्ये पेये विकृतिजनकं मिश्रणं कुर्वते ये
आपो भूमिर्गगनपवनौ दूषितं सर्वमेतैः।

---

8. **आह्वानम्**, प्रणेता- डा.राधेश्याम गंगवारः, प्रकाशकः- ज्ञानप्रकाश संस्कृतपुस्तकालय समितिः, पिथौरागढम्, प्रथमं संस्करणम् 2007, मूल्यम् 100/-
9. **विवेकमञ्जरी**, प्रणेता- डा.रामेश्वरदत्तशर्मा। प्रका. आर्क प्रकाशनं, 3 विकास नगर भिवानी (हरियाणा)। प्रथमं संस्करणं 2007। मूल्यम् 100/-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

लोकान् नैकानं दिनमनुदिनं घातयन्तीह नीचाः
क्षुद्रार्थाय ह्युदरभृतये किं न कुर्वन्ति पापम् ॥

कविना पद्यानां हिन्द्यनुवादोऽपि योजितः।

भारतीय संस्कृति में मानव मूल्य और लोककल्याण[१०]

विदुष्या लेखिकया वैदिककालादारभ्य पञ्चमहाकाव्यानां रचनापर्यन्तं संस्कृतवाङ्मये अभिव्यक्तानां मानवमूल्यानाम् अस्मिन् ग्रन्थे चर्चा कृता। रघुवंशे, कुमारसम्भवे, किरातार्जुनीये, शिशुपालवधे नैषधीयचरिते च कविमुखेन कविनिबद्ध-वक्तृमुखेन च अभिव्यक्तानां मानवीयव्यवहारस्य मूल्यानां प्रतिपादनं कृतम्।

पञ्चमहाकाव्यानन्तरमपि संस्कृतवाङ्मये मानवमूल्यानि नूनमेव अभिव्यक्तानि सन्ति। तेषामपि संस्पर्शः यद्यस्मिन् ग्रन्थे अभविष्यत् तर्हि ग्रन्थस्य उपादेयता अधिकतरा अभविष्यत्। यदि लेखिका अर्वाचीन संस्कृतसाहित्ये मानवमूल्यानि लोककल्याणं चावलम्ब्य अपरमपि कञ्चिद्ग्रन्थं रचयेत् तर्हि तस्याः प्रयत्नाः अभिनन्द्याः स्युः। (रमाकान्तशुक्लः)

अर्वाचीनसंस्कृतम् (पंजी. सं. ३४५५४/७९)

---

१. प्रकाशनस्थानम्-नयी दिल्ली ।
२. प्रकाशनकालावधिः-त्रैमासिकम् ।
३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च-डॉ० रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९
४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली । डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।
२५-१०-२००८ ई०

—रमाकान्तशुक्लः
(प्रकाशकः, सम्पादकः)

---

10. **भारतीय संस्कृति में मानव मूल्य और लोककल्याण,** लेखिका-डा.श्रीमती सुकेश शर्मा, प्रका.संजयप्रकाशन 4378/4 डी209 जे.एम. डी.हाउस, अन्सारी रोड, दरियागंज, नई दिल्ली 110002, प्रथमं संस्करणम्-2008, मूल्यम्-500/-

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

प्रपञ्चचण्डचातुर्यं राष्ट्रं नयत्यधोगतिम्

डा० रामेश्वरदत्त शर्मा
निदेशकः, हरियाणा संस्कृत अकादमी
अकादमी भवन, पी.-16, सेक्टर-14 पंचकूला(हरियाणा)
मो०-9417378001

बह ुदृष्ट्वा बहुश्रुत्वा चिन्तयित्वा मुहुर्मुहुः।
ज्ञातमाडम्बरग्रस्तं पूर्णरूपेण भारतम्।।1।।
प्रायः प्रपञ्चचातुर्यं विज्ञेषु शिखरायते।
तदेव प्रमुखो हेतुः राष्ट्रोन्नतेरवरोधकम्।।2।।
अग्रे बहु प्रशंसन्ति पृष्ठे छिन्दन्ति मर्म ये।
प्रमाणयन्ति ते सत्यम् विषकुम्भं पयोमुखम्।।3।।
धूर्ताः सन्ति न दोषार्हाः,दोषार्हा हि प्रलापिनः।
जानन्तोऽपि वयं मूकाः, अन्धाः स्मो बधिरास्तथा।।4।
प्रायेण विदुषामर्थे गृध्रदृष्टिरवलोक्यते।
त्यागोपदेशदातारो भृशं तृष्णादरिद्रकाः।।5।।
इतस्ततस्तु संगृह्य रचयन्ति कृतीर्बुधाः।
पल्लवग्राहिपाण्डित्यं स्फुटं काव्येषु दृश्यते।।6।।
अन्तः शून्या बहिः स्फाराः सौम्यशान्तमनीषिषु।
व्यर्थं गर्जन्ति मूढा हा मेघाः शरदि निर्जलाः।।7।।
पण्डितम्मन्यमाना हा प्रपञ्चाचार्यपुंगवाः।
वैदुष्यार्हान् पुरस्कारान् लभन्ते गर्ह्यसाधनैः।।8।।
व्यासपीठसमासीना धर्माचार्यास्तु नामतः।
अन्तः श्यामा बहिः श्वेता नानाडम्बरमण्डिताः।।9।।
गीतगायनदक्षास्ते शब्दजालविजल्पकाः।
भ्रामयन्ति जनान् मुग्धान् कथावार्ताप्रसंगतः।।10।।
सम्प्रदायविधातारो भावनोद्वेलकास्तथा ।
विभाजयन्ति भक्तांस्तु राष्ट्रधर्मं न ते विदुः।।11।।

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi

In Public Domain. Digitized by eGangotri and Sarayu Trust Foundation Delhi.

महाप्रभावशाल्यस्ति तेषां प्रचारसाधनम्।
भुञ्जते ते मिलित्वेदम् उच्चपदे हि ये स्थिताः॥12॥
राजनीतिमहोद्योगो नैष किमप्यपेक्षते।
अप्रत्याशितलाभास्तु यस्माद् भवन्ति नित्यशः॥13॥
बाहुबली धनस्वामी मिथ्याश्वासनदायकः।
भ्रष्टाचारी छलच्छद्मी जायते स च सांसदः॥14॥
जातिधर्मकुलाधारा योग्यपरीक्षणेऽक्षमाः।
उत्कोचेन च ये क्रेयाः ते सन्ति मतदायकाः॥15॥
यथा बीजं तथा वृक्षाः यथा माता तथा सुताः।
यथा गुरुस्तथा शिष्या मतदातेव सांसदः॥16॥
व्यापारी तु महागृध्नुः लुण्ठकः शोषको महान्।
अर्थोपार्जनमेवास्ति ध्येयं व्यापारिणां सदा॥17॥
धनं कर्म धनं धर्मो धनमेवास्ति जीवनम्।
सर्वतो धनमायातु राष्ट्रं भ्राष्ट्रे वरं ज्वलेत्॥18॥
भोगैश्वर्याणि भुञ्यन्ते सन्धिविग्रहयोजकैः।
नीतिनिष्ठां तिरस्कृत्य मायाप्रपञ्चमहारथैः॥19॥
कार्यासिद्धेर्हतोत्साहा जानीयुर्न्यायमेवयद्
विजयी पूज्यते लोकैस्तत्साधनं न गण्यते॥20॥
परं मनस्विनो धीरा नीतिधर्मपरायणा
निन्द्यं कर्म न कुर्वन्ति त्यजन्ति जीवनं वरम् ॥21॥

Padma Shri Rama Kant Shukla Collection at Deva Vani Parishad, Uttam Nagar New Delhi